खण्डवाक्यबोधनार्थमेते वर्णपदवाक्याखण्डपदस्फोटा उपायाः।

(२) प्रश्नः—अगृहीतवृत्तिकस्य शब्दस्य शाब्दबोधो भवति न वेति, परमलघुमञ्जूषादिशा विशदयत।

उत्तरम्—'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि', इति गौतमसूत्रं शब्दस्य प्रमाणेष्वन्यतमत्वं स्थापयति। स च शब्दः आप्तोपदेशरूपः प्रमाणं भवति। तत्र आप्तो नामानुभवेन वस्तुतत्त्वस्य कात्स्न्येंन निश्चयवान्, रागादिवशादपि नान्यथावादी यः सः इति चरके पतञ्जलिः प्राह। तद्धर्मावच्छिन्नविषयक-शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः। अत एव नागृहीतवृत्तिकस्य शाब्दबोधो भवति। अत एव—'नहि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते' इति समर्थसूत्रभाष्यं सङ्गच्छते। गुडादिशब्देन गुडत्वजात्य-वच्छिन्नो गुडपदवाच्य इत्येव बोधो जातिप्रकारकः। मधुरत्वं तु 'गुडो मधुर ऐक्षवत्वाद्' इत्यनुमानरूपमानान्तरगम्यम्। विशेषणविशेष्यभावव्यत्यासेन गृहीतशक्तिकस्य पुंसो घटपदाद् घटत्वविशिष्टबोधवारणाय तद्धर्मावच्छिन्नेति। ज्ञाने वृत्तिवैशिष्ट्यं च स्वविषयकोद्बुद्धसामानाधिकरण्यस्वाश्रयविषयकत्वो-भयसम्बन्धेन बोध्यम्। वृत्तिविषयको य उद्बुद्धसंस्कारः तत्सामानाधिकरण्यं वृत्त्याश्रयपदविषयकत्वञ्चेत्यर्थः। अस्ति च घटपदार्थनिरूपितवृत्तिविषयक उद्बुद्धसंस्कारो विषयतया घटपदज्ञानं च।

अयम्भावः—घटादिपदस्य घटत्वादिविशिष्टे शक्तिरित्यादिवृत्तिविशेष्यक-ज्ञानानन्तरं तत्समानाकार एव संस्कार उत्पद्यते। तादृशसंस्कारविशिष्टं पद-ज्ञानं शाब्दबोधे हेतुः। स्वाश्रयपद इत्यस्य फलं तद्वाचकपदाज्ञानवतो न बोधः। अतो नागृहीतवृत्तिकस्य, नापि विस्मृतवृत्तिकस्य, नापि तत्परमजानतो, नापि घटपदाश्रयत्वेनोपस्थिताकाशस्य, नापि जनकतयोपस्थितचैत्रादेश्च बोधः।

(३) प्रश्नः—मतान्तरनिरासपूर्वकं वैयाकरणानामभिमतं शक्ति-पदार्थं निरूपयत।

अथवा

परमलघुमञ्जूषादिशा शक्तिपदार्थं विवेचयत।

उत्तरम्—शब्दस्य तिस्रो वृत्तयो भवन्ति—शक्तिर्लक्षणा व्यञ्जनेति। आसु प्रथमं स्थानं बिभर्ति शक्तिः। इयमेव शब्दस्य मुख्या वृत्तिः। अभिधा अस्या नामान्तरम्।

Scanned with CamScanner